2023

TRIVANDRUM SANSKRIT SERIES

No. CXII.

Śrī Citrodayamañjarī

No. I.

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MADRAS-4

KUCELOPAKHYĀNA

AND

AJĀMILOPĀKHYĀNA

BY

His Highness Svāti Tirunāl
Śrī Rāma Varma Kulasekhara Perumal
Maharajah of Travancore.

988 M. E. / 1813 A. D. TO 1022 M. E. / 1847 A. D.

EDITED BY

K. SĀMBAŚIVA ŚĀSTRĪ

Curator of the Department for the Publication of Oriental Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1932.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ११२.

श्रीचित्रोदयमञ्जरी

ग्रन्थाङ्कः १.

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE,
MADRAS.

९८८ तमादि १०२२ तमान्तकोलम्बाब्दजीविना

महोन्नतमहामहिम्ना
स्वातिश्रीरामवर्मकुलशेखरवञ्चिमहाराजेन
प्रणीतं

कुचेलोपाख्यानम्
अजामिलोपाख्यानं च ।

प्राचीनग्रन्थप्रकाशनकार्याध्यक्षेण
के. साम्बशिवशास्त्रिणा
संशोधितम् ।

तच्च
अनन्तशयने
महामहिमश्रीचित्रावतारमहाराजशासने
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः ११०७, क्रैस्ताब्दाः १९३२.



H. H. Svati Tirunal Sri Rama Varma Kulasekhara Perumal
Maha Rajah of Travancore 1813 to 1847 A. D.

॥ श्रीः ॥

श्रीमूलावनिपालमौलिमणिना सङ्कल्पितश्रीरिव
श्रीमूलात्मजनिस्तथा सहजया लक्ष्म्या च सम्भावितः ।
स्वातिज्योतिरिवादितः समुदिताश्चित्रावतारः स्वयं
मार्ताण्डाग्रसरो विराजति महाराजः स रामाभिधः ॥

भास्वद्वर्णमणिः प्रवालमृदुला श्रुत्याद्यलङ्कारिणी
श्रीमद्भ्रिवसुन्धरानवयशोराशिप्रकाशात्मिका ।
उत्फुल्लत्सुकृतिप्रसाधनधृतामोदोन्नदद्दिण्डिमा
श्रीचित्रोदयमञ्जरी सुमनसां सर्वस्वमुज्जृम्भताम् ॥

के. साम्बशिवशास्त्री.

of the treatise 'शं सदालं निदध्यात्' indicates through Mudrālaṅkāra, the date of completion of the work in the Kali Era, (1803875 days from the beginning of that Era) and the date of the author is thus the first part of the 19th century. Historically, this king was the son of Raṇi Lakṣmi Bai and was born in the month of Meṣa in the year 1813 and demised in his 34th year. His father was Śrī Raja Raja Varma of the Parpa dynasty (Changanacherry) and his mother died in his second year and his maternal aunt Śrī Parvati Bai was the Regent during his minority. Just as the Crescent Moon gathers effulgence through the acquisition of fresh digits, he grew gathering brilliance through his proficiency in all fine arts. His genius and innate aptitude for music and literature, ripened by his education, easily raised him to the position of a great scholar, and poet. This poet was in fact a second creator. He had a rare and perfect mastery over various languages such as Malayalam, Sanskrit, Mahratti, English, Telugu, Kanerese, Tamil and Urdu. His Tutor in English and Politics was Mr. Subba Rao, his future Dewan. And it is most astonishing that the knowledge of the science of Politics proficient in tactics and embellished by exceeding courage, valour and heroism emblazed a heart that was imbued with the sweetest poetical fervour. Such great qualities as serenity, magnanimity, compassion, impartiality and imperiousness illumined his illustrious reign. During the very short period of his life, in the midst of the manifold demands of his kingly office, he attained a unique celebrity as a great man of letters. And his works are:—

1. Śrī Padmanābha Satakam.
2. Syānandūrapuravarṇanaprabandham.
3. Ajāmilopākhyānam.
4. Kucelopākhyānam.
5. Sangītakṛtis (in Sanskrit and Telugu).
6. Utsavavarṇanam Prabandha (both in Sanskrit and Malayalam).
7. Yayāticaritam.
8. Bhaktimañjari.

The two Upākhyanas before us, which are among these works have been published by Mr. K. Chidambara Vadhyar B. A., in Malayalam characters under the title of സംഗീതകൃതി കൾ on account of their musical quality, though they do not

belong strictly to the collection of songs. As we were going to publish his musical compositions in Devanagari characters, we noticed the high literary quality of these two Upakhyanas when compared to the other compositions and considering the separate publication of these two as more appropriate, we do accordingly. Here are a few illustrations that are highly fascinating to the minds of literary connoisseurs:—

मुदितः स चैवमुदितस्तु जायया
विमना अपि स्वयमनारतं धने ।
कमलाधवाङ्घ्रिकमलानतीच्छया
प्रशशंस तामथ शशंस सादरम् ॥ (Page 2).

अमुना भूमिदेवेनाकारि किं ननु
पुण्यमतिदीनशरीरेण ।
मानितोऽयं ननु सरोरुहनाभेन
*भासुरसुगुणारामेण ॥

†"साधु तदा निजभामिनीं
सपदि ददर्श विमोहिनीं
वाद्यगीतवरवनिताकरैः
परिचारितामतिविलासिनीं
रमणनिरीक्षणसम्भ्रमगलदुरु-
बाष्पमुखीं मृदुहासिनीं
सकलाभरणविभूषितदेहां
दिव्यतराम्बरशालिनीं
मनसा निजपदनमनं
सहसा रचयन्तीं गजगामिनीं
पङ्कजनाभकृपामृतवर्षा-
दमरवधूमिव भासिनीम् ।" (Page 8).

$"नामसुधामयि पिब मम रसने !
यामिह पिबता साधुकुलेन
तृप्तिरवाप्ता नो भुवने
यदि हरिनामपरा त्वमिहैका
भवति यमान्नहि भयमपि स्वप्ने" (Page 10).

---

* The suggestion here is relishable to Sahrdayas

† The attributes qualifying Kuce'a's wife are full of suggestion and afford the possibility of recognitive visualisation.

$ The result is indicated.

*"किञ्च जन्मशतकोटिकृतानां
पाप्मनां हृदमनेन हि लोके ।
निष्कृतिर्विरचिता हरिनाम
व्याजहार यदसौ श्रुतिरम्यम् ॥"
(Page—13.)

†"भुजगशायिनो नाम मङ्गलं
परमजानतापीह कीर्तितम् ।
दहति पाप्मनां जालमञ्जसा
भुवि शिखी यथा दारुसञ्चयम्" ॥

Thus in considering the inner contents of this little work, it becomes evident to real critics that these two pieces though short, entitle the author to the status of a Mahakavi by virtue of the matter and manner.

The poetic license evinced by the author as by Kālidāsa and Bhāsa in the untrammelled progress of his literary art does but conduce to æsthetic charm. For instance, we notice,

"सकृदिह मुष्टिं तस्माद्
गृह्णन् बलतो बुभोज पृथुकानाम् ।"

Two manuscripts were utilised in the publication of the present work. One is the publication in Malayalam by Mr. Chidambara Vadhyar and the other belongs to Dr. Rohini Tirunal Raja of Maṇṇoor Maṭom Palace, Mavelikkara. It s more correct and praise-worthy.

Trivandrum,
15-12-1107. } K. SĀMBAŚIVA ŚĀSTRI.

---

* There is the suggession of the condonation of sin through the words हरि and श्रुतिरम्यम्.

† By the example of logs of wood, there is the suggession of the burning away of very severe sins.

श्रीः

अवतारिका ।

महोन्नतमहामहिमश्री श्रीचित्रावतारमहाराजस्य भरणाधिकारप्रतिष्ठापनमहोत्सवमनुस्मार्य समुचितेन 'चित्रोदयमञ्जरी'नाम्ना समुत्तम्भितेयमनन्तशयनसंस्कृतग्रन्थावलिरधुना कामपि महनीयपदविन्यासमञ्जुलां गतिमवलम्ब्य सुमनःसमुल्लाससरसा सुन्दरीव मन्ये नवनवां यौवनश्रियमधिगता । अस्यां प्रथमोऽयं गुच्छ इदमुपाख्यानद्वयं नाम । सुविमलेन विज्ञानधनेन कृतसेवनं कुचेलम्, अतिमधुरेण नामकीर्तनेन लब्धभक्तिमजामिळं च सम्पत्प्रापणेन जीवनदानेन च रक्षित्वात्मीयतां नीतवतः श्रीपद्मनाभस्याश्रितजनपरिपालनप्रवणमात्मकृत्यं प्रशंसतानेनोपाख्यानद्वयेन श्रीपद्मनाभदासस्य महाराजस्य स्वामिसमुचितां वृत्तिमभिव्यज्य स्थाने प्राथम्यमत्रावापि । किञ्च महोन्नतमहामहिमश्रीस्वातिश्रीरामवर्मवङ्चिमहाराजेन प्रणीतस्यास्य ततोऽपि प्राथम्यमिह चित्रोदयमञ्जर्यां प्राप्तावसरम् । यस्य हि कवेरनितरसाधारणा स्वकुलदैवते श्रीपद्मनाभे भक्तिरप्रतिहता । यदपि फलमिदमुपाख्यानद्वयमदसीयभक्तिमञ्जर्याः ।

कविरयं स्वकृतेः स्यानन्दूरपुरवर्णनचम्पूप्रबन्धस्यान्तिमेन

"स्वातीजातेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मी-
राज्ञीपुत्रेण वञ्चीश्वरकुलजनुषा रामवर्माभिधेन ।
भक्त्युद्रेकेण शश्वद् गुरुवरकृपया निर्मितं चम्पुकाव्यं
स्यानन्दूरेश्वरस्य प्रमितमुपहृतं शं सदालं निदध्यात् ॥"

इति पद्येन स्वातीनक्षत्रजातः लक्ष्मीराज्ञ्याः पुत्रो रामवर्माभिधः श्रीवञ्चिमहाराज इति सिध्यति । अपिच 'चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मीराज्ञीपुत्रेणे'ति विशेषणाभ्यामन्योन्यालिङ्गितार्थप्रतिपादनदिशा घटनापौर्वापर्येण च 'सर्वं वाक्यं सावधारणमि'ति न्यायेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन सतैव लक्ष्मीराज्ञीपुत्रत्वे प्रवेश इति सूचयद्भ्यां गर्भश्रीमानयं महाराज इत्यपि सिद्धम् । "शं सदालं निदध्याद् इत्यनेन कलिदिनारम्भात् प्रभृति त्रिसहस्राष्टशत-

पञ्चसप्तत्यधिकाष्टादशलक्ष(१८०३८७५)दिवसेषु गतेष्वेतत्प्रबन्धसमाप्तिरिति सूचनाद् मुद्रालङ्कारः" इति तत्पद्यव्याख्यातृरीत्या क्रिस्तीयैकोनविंशशताब्द्याः पूर्वभागोऽस्य कवेर्जीवितसमय इति लभ्यते। निष्कृष्य चरित्रादिशा १८१३-तमसंवत्सरे मेषमासि लक्ष्मीदेव्यां लब्धावतारोऽयं चतुस्त्रिंशे वयसि स्वर्गमारुरोहेति प्रसिद्धिः। गर्भ एवात्मसमर्पणादिव वत्सरे द्वितीये लक्ष्मीदेव्या मात्रा वियुक्तस्यास्य, पर्परराजवंश्यः श्रीराजराजवर्मदेवः पिता, प्रतिनिधिभूय राज्यं शासती श्रीपार्वतीराज्ञी मातृष्वसा च पोषकौ बभूवतुः। क्रमशः सर्वासु कलासु क्रममाणोऽयं बालचन्द्र इव नचिरात् सम्पूर्णमण्डलो ददृशे। सङ्गीतसाहित्ययोराजानसिद्धा प्रतिभामुमनायासेन विद्याभ्यासेन समुत्तेजनक्षमेण कमपि महान्तं पण्डितं कविं च चक्रे। कैरळी-गैर्वाणी-आङ्गली-माहाराष्ट्री-आन्ध्री-कार्णाटी-द्राविडी-हिन्दुस्थानी इत्याभरनेकाभिर्भारतीभिरनितरसुलभाभिः स्वयंवृतोऽयं कश्चिदपर एव कविर्ब्रह्माभवत्। किमधिकेन, अमात्यभावी श्रीसुब्बरायोऽस्य आङ्गलविद्यायामनुरूपेषु राज्यतन्त्रकलाकौशलेषु चाचार्योऽभवत्। आश्चर्यमिदमेव तत्र महाराजे काममतिभूमिमगमत्, यत् क्वचन काव्यालापसरससरसेऽपि मानसपञ्जरे कूटप्रयोगकुशलं राज्यतन्त्रविज्ञानमतिवीर्यशौर्यपराक्रमोपस्कृतमैकाधिकरण्येन प्रविवेश। गाम्भीर्यौदार्यदयादाक्षिण्यैकशासनत्वादयो महागुणा अस्य भरणाभरणतां प्रतिपद्य निकामं शुशुभिरे। अतिह्रसीयस्यपि जीवितसमये, महति महत्यपि राज्यकार्यवैधुर्ये जाग्रति सरससाहित्वीकारख्यातेरप्ययमसामान्यं भाजनमासीत्। कृतयश्चास्य —

१. श्रीपद्मनाभशतकम्।
२. स्यानन्दूरपुरवर्णनप्रबन्धः।
३. अजामिलोपाख्यानम्।
४. कुचेलोपाख्यानम्।
५. सङ्गीतकीर्तनानि (संस्कृतआन्ध्रगादिभाषासु च)।
६. उत्सववर्णनप्रबन्धः (संस्कृतकेरलोभयभाषारूपः)।
७. ययातिचरितम्।
८. भक्तिमञ्जरी।

इत्येताः।

प्रकृतमुपाख्यानद्वयम्—उक्तासु कृतिष्वन्यतमे भिन्ने अपीमे उपाख्याने "സംഗീതകൃതികൾ" इति संज्ञया केरललिप्या मुद्रिते पुस्तके तत्प्रसाधकेन श्रीमता के. चिदम्बरनाध्यार् बि. ए. बिरुदधारिणा गानानुगुणपदजातस्य निमित्तस्यान्तर्भविते । परन्तु तासामेव सङ्गीतकृतीनां देवनागरलिप्यां मुद्रणप्रकाशने चोदितोऽहमनयोरुपाख्यानयोरुत्तमसाहितीकक्ष्यामन्यासां गीतीनामतथाविधतां चावेक्ष्य पृथक्करणमुचितं मन्यमानस्तदनुगुणं प्रसाधनमकरवम् । अत्र चेमानि सहृदयदृशामासेचनकानि मनागुदाहरणानि —

"मुदितः स चैवमुदितस्तु जायया
विमना अपि स्वयमनारतं धने ।
कमलाधवाङ्घ्रिकमलानतीच्छया
प्रशशंस तामथ शशंस सादरम् ॥"

(पु. २. श्लो. ५)

"अमुना भूमिदेवेनाकारि किं ननु
पुण्यमतिदीनशरीरेण
मानितोऽयं ननु सरोरुहनाभेन
[1]भासुरसुगुणारामेण"

(पु. ५. गानं ७)

[2]"साधु तदा निजभामिनीं
सपदि ददर्श विमोहिनीं
वाद्यगीतवरवनितानिकरैः
परिचरितामतिविलासिनीं
रमणनिरीक्षणसम्भ्रमगलदुरु-
बाष्पमुखीं मृदुहासिनीं
सकलाभरणविभूषितदेहां
दिव्यतराम्बरशालिनीं
मनसा निजपदनमनं
सहसा रचयन्तीं गजगामिनीं

---

१. 'अतिदीनशरीरेण भासुरसुगुणारामेण' अत्र ध्वनिः सहृदयवेद्यः ।

२. अत्र कुचेलपत्नीविशेषणानि ध्वनिमर्यादया तत्त्वप्रत्यभिज्ञापकानि ।

पङ्कजनाभकृपामृतवर्षा-
दमरवधूमिव भासिनीम्"

(पु. ८. गानं ११)

"नामसुधामयि पिब मम रसने!
यामिह पिबता साधुकुलेन
तृप्तिरवाप्ता नो भुवने
यदि हरिनामपरा त्वामिहैका
भवति यमान्नहि भयमपि स्वप्ने"

(पु. १०. गानं १)

"किञ्च[2] जन्मशतकोटिकृतानां
पाप्मनां दृढमनेन हि लोके।
निष्कृतिर्विरचिता हरिनाम
व्याजहार यदसौ श्रुतिरम्यम्॥"

(पु. १३. श्लो. १३)

"भुजगशायिनो[3] नाम मङ्गलं
परमजानतापीह कीर्तितम्।
दहति पाप्मनां जालमञ्जसा
भुवि शिखी यथा दारुसञ्चयम्॥"

(पु. १४. श्लो. १४)

इत्थमाभ्यन्तरविचारे प्रस्तूयमाने खण्डकाव्ययोरप्याकृत्या, प्रकृत्या महाकवि-व्यपदेशानुरूपो महिमातिशयो महाराजस्थानयोरुपाख्यानयोः प्रतिफलित इति विदन्ति रसिकतमाः।

महाकवेरस्य भासकालिदासादिवत् प्रयोगे निरङ्कुशत्वमनिवारित-प्रसरे साहितीपरिस्पन्दे भवति महत्यै शोभायै।

---

१. वस्तुनिर्देशकृत्यं फलात्मना च।

२. अत्र हरि-श्रुतिरम्यपदयोः पापहरणध्वनिः।

३. अत्र दारुसञ्चयदृष्टान्तेन कठिनकठिनपापनिर्दहनम्।

तथाच दृश्यते क्वचित् —

"सकृदिह मुष्टिं तस्माद्
गृह्णन् बलतो बुभोज पृथुकानाम् ।"

(पु. ६. श्लो. १९)

इति ।

एतत्प्रसाधनाधारौ द्वावादर्शौ । तयोरेकः श्रीमच्चिदम्बरवाध्यारप्रसाधितः केरललिपिमुद्रितः, द्वितीयः मावेलिक्कर मण्णूरमठं कोट्टारं श्रीमद्-रोहिणीराजस्वामिकः शुद्धतरो विशिष्य प्रशंसार्हः ।

अनन्तशयनम्,
१५-१२-१०७.

के. साम्बशिवशास्त्री.

क्वचित् त्रयीपाठपरायणानां
शुश्राव घोषं धरणीसुराणाम् ।
महीसुरो विस्मयसाध्वसह्री-
सन्तोषपर्याकुलितान्तरात्मा ॥ ११ ॥

गानं—५. धन्यासि. रूपकम्.

प. सन्ददर्श भूसुरमणिरपि च हर्म्यजालं

अ. श्रीसरसिजनाभभक्तयादवौघभरितं
क्वचन रुचिरहेमकुम्भलसितमतिविशालं सन्ददर्श

श्लो. गुल्मत्रयं स समतीत्य ततश्च कक्ष्याः
श्रीकृष्णपादयुगदर्शनकौतुकेन ।
वेगेन षोडशसहस्रवधूगृहाणां
शैव्यागृहं प्रतिविशन् परमाप मोदम् ॥ १२ ॥

आर्या. तत्र तदानीं तस्याः सदने लीलाविशेषरतचित्तम् ।
त्रिजगन्नाथं शौरिं भूमिसुरः प्राप निर्भरप्रीत्या ॥ १३ ॥

गानं — ६. कामोदरी. आदिः.

प. पूर्णचन्द्राननमैक्षतासौ यादवेशं

च. (१) मणिमञ्चकृतवासं विशदविभूषणभासं
लसदमलमृदुहासं नीलकेशं पूर्ण

(२) दयितामनु सहेलं निगदन्तमनुवेलं
दधतं स्विन्नमतिवेलं फालदेशं पूर्ण

(३) जलजनाभमभिरामं वन्यमालया निकामं
रमयन्तं तामतिवामं भूरमेशं पूर्ण

---

१. 'बिलन्दि' ग. पाठः.

श्लो. दृष्ट्वा दूरे कुचेलं सपदि स भगवान् बाल्यमित्रं प्रमोदा-
दुत्थायोपेत्य संश्लिष्य च सरसमसुं गाढमश्रूणि मुञ्चन् ।
पर्यङ्के सन्निवेश्य स्वयमथ विधिवत् साधु सम्पूज्य सद्यो
लिम्पन् पाटीरपङ्केन च सुरभितमेनाब्रवीत् स्वागतं तम् ॥१४॥

आर्या. तावत् पर्यचरत् तं देवी शैब्या च तालवृन्तेन ।
यस्मै मुदितो भगवान् मुरभिदलभ्यं भुवीह किं तेन ॥ १५ ॥
दृष्ट्वा त्रिभुवनपतिना सादरमभिपूजितं कुचेलं तम् ।
अन्तःपुरजननिकरो विस्मयभरितो मिथोऽब्रवीदेवम् ॥ १६ ॥

गानं—७. यमुनाकल्याणी. आदितालः.

प. अमुना भूमिदेवेनाकारि किं ननु
पुण्यमतिदीनशरीरेण
च. मानितोऽयं ननु सरोरुहनाभेन
भासुरसुगुणारामेण अमुना

अार्या. कथयामासतुरेतौ
कृष्णकुचेलौ कथाः पुरातीताः ।
गुरुकुलवसतौ स्वैरं
धृत्वा च मिथः करौ तदा प्रीत्या ॥ १७ ॥

गानं—८. कौफी. आदिः.

प. स्मरसि पुरा गुरुवनितावचसा
गतमस्माभिर्विपिनमतितरसा स्मरसि
च. (१) इन्धनजालसमानयनार्थं
निशि तिमिरेण तदा विततायां
सोढं वर्षं जातमकाले
भ्रान्तं विधृतकरैरयि ! सहसा स्मरसि

---

१. 'आनन्दभैरवी ।' ग. पाठः.

च. (२) उषसि समेत्य स देशिकतिलको
दृष्ट्वास्मानिह वलितान् विपिने
मोदपरीतोऽनुग्रहमकरो-
दतिकरुणार्द्रतरेण हि मनसा स्मरसि

(३) एवं सरसिजनाभो भगवान्
तमिह कुचेलं शंसन् सरसं
स पुनरभाणीदेतां वाणीं
द्विजमनु जितमिहिरो निजमहसा स्मरसि

श्लो. मह्यं किमानीतमुपायनं त्वया
तद् दीयतां मे यदिहार्पितं जनैः ।
भक्तैरपि स्तोकमहो महद् भवे-
दित्थं स पृष्टोऽपि ददौ न लज्जया ॥ १८ ॥

आर्या. विज्ञायागमहेतुं
तस्य चिकीर्षुश्च तं जितधनेशम् ।
सकृदिह मुष्टिं तस्माद्
गृह्णन् बलतो बुभोज पृथुकानाम् ॥ १९ ॥

आरभमाणे भोक्तुं
पुनरपि मुष्टिं द्वितीयमपि देवे ।
प्राप्ता तरसा लक्ष्मी-
स्त्वलमिति पाणिं प्रभोस्तदा जगृहे ॥ २० ॥

श्लो. द्विजो निशां तां हरिमन्दिरे नयन्
यथासुखं भोजनपाननिर्वृतः ।
दिने द्वितीये प्रययौ धनं विना
निजालयं व्रीळितमानसस्ततः ॥ २१ ॥

आर्या. निजसदनं प्रति गच्छन्
भूसुरमौलिस्ततो हरिनिकेतात् ।
मध्येमार्गं चिन्ताम्
एतामगमद् विलज्जितः काममम् ॥ २२ ॥

गानं—९. बिहाग्. आदितालः.

प. जलधिसुतारमणेन हि सोऽहं
सरसमालिङ्गितो निस्सन्देहम्

च. (१) पर्यङ्के निजदयितासहिते
समुपाकलितो नवसुमलसिते जलधि
(२) वालव्यजनविराजितकरया
परिचरितो निजसुदृशा वरया जलधि
(३) अधनोऽवाप्य हि वित्तमसीमं
स्मरति न मामिति न ददौ कामं जलधि
(४) यदि खलु याच्ञा रचिता हि मया
दास्यति भगवान् सकलं दयया जलधि
(५) सरसिजनाभ! हरे! बहुतान्तां
किन्नु वदामि गतो मम कान्तां जलधि

श्लो. इत्थं विचिन्त्य धरणीसुरमौलिरेष
श्रीकृष्णदिव्यवचनामृतपानतृप्तः।
सम्प्राप्तवान् स्वभवनान्तिकमम्बुजाक्ष-
पादारविन्दयुगळं कलयन् हृदन्तः॥ २३॥

दृष्ट्वा तदाथ मणिगोपुरसौधसञ्च-
याट्टालकादिसुपरिष्कृतमेष गेहम्।
कस्येदमत्र भवनं किमिदं हि यद्वा
मार्गभ्रमोऽयमिति सोऽयमवाप शङ्काम्॥ २४॥

आर्या. विस्मयहर्षनिमग्नः
स्थित्वा क्षणमेष चित्रवत् तत्र।
परितो निरीक्षमाण-
श्चिन्तितवानेवमाशु ननु चित्ते॥ २५॥

---

१. 'आहरि' ग. पाठः.

गानं—१०. यमुनाकल्याणी. रूपकम्.

प. अहह नैव जाने

च. (१) काञ्चननवरत्नलसितगोपुर-
मिह किं मदीयमहो दयाराम ! रामराम ! अहह

(२) प्रचुरगन्धदिव्यधूपसुरभिकुसुम-
परिमिळितं लसति भूरि धामधाम धाम अहह

(३) श्रीसरसिजनाभ ! चरणयुगळविनत-
लोकनिकरकलितसर्वकाम ! कामकाम ! अहह

गानं—११. तोटी. आदिः.

प. साधु तदा निजभामिनीं
सपदि ददर्श विमोहिनीं साधु

च. (१) वाद्यगीतवरवनितानिकरैः
परिचरितामतिविलासिनीं साधु

(२) रमणनिरीक्षणसम्भ्रमगळदुरु-
बाष्पमुखीं मृदुहासिनीं साधु

(३) सकलाभरणविभूषितदेहां
दिव्यतराम्बरशालिनीं साधु

(४) मनसा निजपदनमनं
सहसा रचयन्तीं गजगामिनीं साधु

(५) पङ्कजनाभकृपामृतवर्षा-
दमरवधूमिव भासिनीं साधु

श्लो. गत्वा स्वकीयसदनान्तरयं महिष्या
साकं तया वरविभूषणभूषिताङ्ग्या ।
दृष्ट्वा स सम्पदमसीमतरां प्रसन्नो
भूमीसुरः परमतर्कयदेवमन्तः ॥ २६ ॥

---

१. 'बिलन्दि', २. 'भैरवी' ग. पाठः.

गानं — १२. बिभास्. आदिः.

प. माधवालोकनं नूनं मामकोदयनिदानम्
अन्यथा कथमवाप्ता सम्पदेवमिता माधवा

च. (१) अपि परमयाचितो हृदि मोदसुपरीतो
दिशति चार्थिततये जलदवदविता माधवा

(२) स्वजनोपदां मितामपि मानयति महितां
मदुपायनवदहो मदनजनयिता माधवा

(३) नवतोयधराभे भवतु सारसनाभे
मम सदा मतिरहो प्रेमभारभरिता माधवा

श्लो. एवं विनिश्चित्य स भूसुरेन्द्रः
पश्यन् मदोत्थं धनिनां निपातम् ।
प्रवृद्धभक्तिश्चिरमब्जनाभे
बुभोज कामानतिसङ्गहीनः ॥ २७ ॥

योऽसौ दीनं कुचेलं द्विजवरमतनोत् सर्वसम्पत्समृद्धं
गृह्णन् तस्माच्च मुष्टिं बत पृथुकमयीं व्रीळितात् सौहृदेन ।
तं वै कारुण्यसिन्धुं भजत भुवि जनाः ! सर्वलोकैकनाथं
सच्चित्सान्द्रस्वरूपं नवजलदनिभं श्रेयसे पद्मनाभम् ॥ २८ ॥

इति कुचेलोपाख्यानं समाप्तम् ॥

---

२. अजामिळोपाख्यानम्.

श्लो. भर्तुर्वक्षसि भासिते सुविमले संवर्त्तकालोत्कट-
प्रोद्यत्कोटिविकर्त्तनच्छविघटासर्वंकषे कौस्तुभे ।
दृष्ट्वा वर्ष्म निजं प्रियोरसि गतामन्यां विशङ्क्य श्रियो
रुष्टाया हृदयानुवर्तनरतः श्रीपद्मनाभोऽवतु ॥ १ ॥

गानं — १. काम्बोधि. आदिः.

प. नामसुधामयि पिब मम रसने ! नाम

च. (१) यामिह पिबता साधुकुलेन
तृप्तिरवाप्ता नो भुवने नाम

(२) यदि हरिनामपरा त्वमिहैका
भवति यमान्नहि भयमपि स्वप्ने नाम

(३) सारसनाभ ! विभो ! नारायण !
माधवेति निगद मुखेऽपि च कदने नाम

श्लो. कन्याकुब्जे बभूव श्रुतविदुरुमहाः संज्ञयाजामिळः प्राग्
भूमीदेवो हि कश्चिच्छुचिरनघतमः साधुवृत्तोपपन्नः ।
स्निग्धां मुग्धां गृहाश्रम्यथ निजसदृशीं वल्लभां प्राप्य काले
देवाचार्याग्निशुश्रूषणमुखममलं चाचरन् धर्ममार्गम् ॥ २ ॥

गानं — २. यमङ्कल्याणी. बिलन्दि.

प. विपिनमसौ समगादेकदा

च. (१) तातोक्त्या कुशसमिधो नेतुं
मानसपूर्णमुदा विपिनं

(२) कुलटां काञ्चन पथि स निवृत्तो
वीक्षत हन्त तदा विपिनं

च. (३) हेयामनिशं योजितहृदयैः
सारसनाभपदा विपिनं

आर्या. स्वैरिण्या परिरब्धो विगळितमन्दाक्षलेशमेष तया ।
समभूत् सोढुं मोहं नैव समर्थः स कामविवशतया ॥ ३ ॥

श्लो. स्वधर्माद् विरम्याशु पित्र्येण भूयो
धनेनेह सन्तोष्य तां पुंश्चलीं सः
कुलीनां च बालां विसृज्य स्वपत्नीं
चिरं बिभ्रदासीच्च दासीकुटुम्बम् ॥ ४ ॥
प्रणष्टे स्वपित्र्ये धनौघे समस्ते
सदा पुंश्चलीपोषणे जागरूकः ।
अवद्यैः स चौर्यैः पुनर्द्यूतकृत्यै-
रवाप्यार्थमेनां सुरा(पां ? पीं) पुपोष ॥ ५ ॥

गानं — ३. झेंझोटि. बिलन्दि.

प. कुटिलामसतीमिमामरमयदयमेवं
च. (१) हेयसुरापानसदाशोणितनेत्रां तां
रागमन्युलोभमोहशमलभृतस्वान्तां कुटिलां
(२) मुहुरपि मत्तप्रलपनमवशं कलयन्तीं
स्वामिह समालोक्य विना कारणं हसन्तीं कुटिलां
(३) पद्मनाभपदविस्मरणैकहेतुभूताम्
आत्मनो नजानन्नयमपि चिरतरमेतां कुटिलां

आर्या. अष्टाशीतिवयस्कस्त्वस्यां जातेषु दशसु तनयेषु ।
अन्तभवे प्रेमभरं नारायणनाम्नि हन्त स बभार ॥ ६ ॥

गानं — ४. दिण्डि.

समालोक्यासौ बालकं हसन्तं
तुतोषास्फुटोक्त्याथ तं लसन्तं;

मुदा लीलायामस्य सोऽनुवेलं
मुमोचाश्रूणिं निश्चलोऽतिवेलं;
त्रिलोकाधीशं चिन्मयं घनाभम्
अनाराध्यैवानिशं पद्मनाभम्.

श्लो. भुञ्जानः प्रपिबन् सुतं ममतया सम्भोजयन् पाययन्
मन्वानः क्षणलेशमप्यमुमृते कल्पोपमं दुस्सहम् ।
स्वप्नेऽप्यच्युतचिन्तया विरहितः पापः स दासीपति-
र्वृद्धस्त्वागतमन्तकं नच विवेदात्यन्तमूढाशयः ॥ ७ ॥

उपस्थितायामथ पञ्चतायां
भयङ्करांस्त्रीन् यमराजदूतान् ।
दृष्ट्वाप्लुतेनाकुलधीः स्वरेण
नारायणेत्यर्भकमाजुहाव ॥ ८ ॥

आर्या. तावत् तन्मुखगळितश्रीहरिनामाक्षरैकमाहात्म्यात् ।
दिव्यस्वरूपवन्तो माधवदूताः समापतन्नारात् ॥ ९ ॥

गानं—५. आहरि. अटताळः.

प. वारयामासुरमी हरिदूता याम्यानधिकजवेन वारयामासु

च. (१) वीक्ष्य पाशेनावलयितमेनं
निरुपमकदनावहेन
मा मा नयत विमुञ्चत सहसा
यूयममुमिति बलेन वारयामासु

(२) तदिह निशम्य वचो यमदूता
जगदुरमूनन्तकेन
सम्प्रेषिता हि वयं विनिवारिता
वदत केन कारणेन वारयामासु

---

१. 'वैष प ग. पाठः.

छन्द्. भुजगशायिनो नाम मङ्गळं
परमजानतापीह कीर्तितम् ।
दहति पाप्मनां जालमञ्जसा
भुवि शिखी यथा दारुसञ्चयम् ॥ १४ ॥

आर्या. यदि खलु वः सन्देहो धर्मेऽस्मिन् परमुदीरितेऽस्माभिः ।
पृच्छत संयमिनीशं स्वं पतिमेवाशु धर्ममर्मविदम् ॥ १५ ॥

श्लो. श्रुत्वा श्रीहरिसेवकैर्निगदितामेतामसौ भारतीं
दिव्यं भागवतं च धर्ममलं निर्णीय ते सत्वरम् ।
निर्मुच्यामुमजामिळं सुविवशं याम्याच्च पाशात् ततो
मृत्योस्तावदमूमुचन्नथ भटाः सूनोस्त्विषामीशितुः ॥ १६ ॥

गानं—७. बिहाग्. आदिः.

प. ननामाखिलेशानुगानसौ मुदामेयया

च. (१) पाशाद् विमुक्तोऽसौ तदा प्रकृतिमितो निजां
भासितानुरुवनमालया ननाम

(२) श्रीपद्मनाभे मानसं दधौ गुणान् निशमयन्
विरहितो घनपापबाधया ननाम

आर्या. आत्मकृतं पुनरशुभं संस्मरतोऽथास्य भूमिदेवस्य ।
बन्धविमोचनहेतुः पश्चात्तापो महानमूदेवम् ॥ १७ ॥

गानं—८. भैरवी. बिलन्दि.

प. मुधैव यातानि दिनानि शतं

अ. हा मम कुलटायामिह दधतो मानसमनवरतं मुधैव

च. (१) भामिनीमिह निजामपि विहाय कृतं कर्म मयावमतं
जरठौ मातापितरौ गमितौ शोकमहो वितनं मुधैव

(२) क्षुधिततमाय वै भूमिसुराय हन्त यथाभिमतं
नैव वितीर्णं जातुचिदन्नं धिङ्मां पापरतं मुधैव

च. (३) तीर्थकुलेऽपि नो स्नातं शुभदे तेजो मम विहतं
पङ्कजनाभपदसरोरुहयोः सकृदपि नैव नतं मुधैव

आर्या. उत्पथगैरिह भोज्ये धर्मघ्नैरेष दारुणे नरके।
नूनं सपदि पतिष्यति पुरुषो हा हन्त गर्हितः सद्भिः ॥१८॥

श्लो. ये मां व्यकर्षन्निह पाशहस्ता
भयङ्करास्ते क्व गतास्त्विदानीम्।
व्यमोचयन्मां सहसा हि तेभ्यो
ये तेऽपि याताः क्व मनोज्ञरूपाः ॥ १९ ॥

आर्या. क्वासौ पापतमोऽहं क्वचखलु नारायणेति नाम शिवम्।
तस्मात् तथा यतिष्ये मग्नो न स्यां यथा पुनर्मोहे ॥२०॥

गानं—९. बिभास्. अटताळः.

इति समुपागतनिर्वेदोऽयं
गङ्गाद्वारमवाप्तः सहसा
तत्र देवसदने विलसन् देवं
माधवमचिन्तयदिह हृदि तरसा इति समु
तदनु विलोक्यासौ तानेव दूतान्
शौरेर्ववन्दे विनतेन शिरसा इति समु
शोषितांहोमयकर्दमराशिः
श्रीपद्मनाभपदाम्बुजरजसा इति समु

श्लो. तीर्थे मुक्त्वा शरीरं सपदि स भगवत्पार्षदानां स्वरूपं
गृह्णन् तैरेव सार्धं विमलतममथारुह्य हैमं विमानम्।
प्राप्तो वैकुण्ठमाद्यं सुरमुनिनिवहैर्भक्तियुक्तैः समेतं
यत्रासौ देवदेवीति श्रितविबुधतरुः पद्मनाभो घनाभः ॥२१॥

श्रुत्वा यमोऽथ निजभृत्यमुखादुदन्तं
भक्तेषु वै मधुरिपोस्तु न गच्छतेति ।
संवार्य तान् निजमघं परिमार्ष्टुकामः
संप्रार्थयन् मुहुरवन्दत पद्मनाभम् ॥ २२ ॥

पापः सोऽयमजामिळाख्यधरणीदेवो विमुक्तिं गतो
यन्नामग्रहणेन सोऽथ भगवान् कारुण्यलेशेन नः ।
आयुःश्रीसुखकान्तिकीर्तिविजयान् दद्यादजस्रं मुदा
श्रीभूमीपरिवेष्टितो निरुपमः श्रीपद्मनाभो हरिः ॥ २३ ॥

इति अजामिळोपाख्यानं समाप्तम् ॥

शुभं भूयात् ।

श्लोकानुक्रमणी ।

श्लोकः.	पृष्ठम्.
अष्टाशीतिवयस्कः	११
आत्मकृतं पुनरशुभं	१४
आरभमाणे	६
इति कथितां याम्यभटैः	१३
इतीरितेयं	३
इत्थं विचिन्त्य	७
इमां निशम्य भारतीं	१३
उत्पथगैरिह	१५
उपस्थितायामथ	१२
एवं विनिश्चित्य	९
कथयामासतुरेतौ	५
कन्याकुब्जे	१०
किञ्च जन्मशतकोटि	१३
क्वचित् त्रयीपाठ	४
क्वासौ पापतमोऽहम्	१५
गङ्गाधरादत	१
गत्वा स्वकीय	८
गुल्मत्रयं स समर्तात्य	४
गेहे गेहे स खलु	२
तत्र तदानीं	४
तथापि कल्याणि !	३
तस्य च दयिता	२
तावत् तन्मुखगलित	१२
तावत् पर्यचरत्	५
तीर्थे मुक्त्वा शरीरं	१५
दृष्ट्वा तदाथ	६

श्लोकः.	पृष्ठम्.
दृष्ट्वा त्रिभुवनपतिना	५
दृष्ट्वा दूरे	,,
द्विजो निशां तां	६
निजसदनं प्रति	,,
निदेशपाला यदि	१३
पन्नगशयनपदाब्ज	३
पापः सोऽयं	१६
प्रणष्टे स्वपित्र्ये	१९
भर्तुर्वक्षसि	१०
भुजगशायिनो नाम	१४
भुञ्जानः प्रपिबन्	१२
मह्यं किमानीत	६
मुदितः स चैवं	२
यदि खलु वः सन्देहो	१४
ये मां व्यकर्षन्निह	१५
योऽसौ दीनं कुचेलं	९
विचिन्तयन्नेवं	३
विज्ञायागमहेतुं	६
विशन् पुरान्तः	३
विस्मयहर्ष	७
श्रुत्वा यमोऽथ	१३
श्रुत्वा श्रीहरिसेवकैः	४
सान्दीपनेरथ	१
स्वधर्माद् विरम्याशु	१०
स्वैरिण्या परिरब्धः	,,

रागानुक्रमणिका ।

रागः.	पृष्ठम्.	रागः.	पृष्ठम्.
अठाण	१३.	धन्यासि	४.
आहरि	१२.	पूर्वी	२.
काफी	५.	बिभास्	९, १५.
कामोदरी	४.	बिहाग्	७, १४.
काम्बोधि	१०.	भैरवी	१४.
खट्	१.	मध्यमावती	३.
झेञ्झोटि	११.	यमुनाकल्याणी	२, ५, ८.
तोटी	८.	यमङ्कल्याणी	१०.
दिण्डि	११.		

कुचेलोपाख्यानगानानुक्रमणिका ।

पृष्ठम्	गानम्	रागः	गानसङ्ख्या
५	अमुना भूमिदेवेन	यमुनाकल्याणी	७
८	अहह नैव जाने	,,	१०
२	जगतीनायकं व्रजामि	पूर्वी	३
७	जलधिसुतारमणेन	बिहाग्	९
४	पूर्णचन्द्राननम्	कामोदरी	६
१	भज भज मानस !	खट्	१
२	भजसि न किं बत !	यमुनाकल्याणी	२
९	माधवालोकनं नूनं	बिभास्	१२
४	सन्ददर्श भूसुरमणिः	धन्यासि	५
८	साधु तदा निज	तोटी	११
३	स्मरति नु मां सदयं	मध्यमावती	४
५	स्मरसि पुरा गुरु	काफी	८

अजामिलोपाख्यानगानानुक्रमणिका ।

पृष्ठम्	गानम्	रागः	गानसङ्ख्या
१५	इति समुपागत	बिभास्	९
११	कुटिलामसतीं	झेञ्झोटि	३
१३	धर्ममार्गपालसभां	अठाण	६
१४	ननामाखिलेशानुगानसौ	बिहाग्	७
१०	नामसुधामयि पिब	काम्बोधि	१
१४	मुधैव यातानि	भैरवी	८
१२	वारयामासुरमी	आहरि	५
१०	विपिनमसौ समगात्	यमङ्कल्याणी	२
११	समालोक्यासौ	दिण्डि	४

	RS.	AS.	P.
No. 9—**विरूपाक्षपञ्चाशिका Virupaksapancasika** (Vedānta) by Virūpākṣanātha with the commentary of Vidyācakravartin (*out of stock*).	0	8	0
No. 10—**मातङ्गलीला Matangalila** (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*).	0	8	0
No. 11—**तपतीसंवरणम् Tapatisamvarana** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	4	0
No. 12—**परमार्थसारम् Paramarthasara** (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*).	0	8	0
No. 13—**सुभद्राधनञ्जयम् Subhadradhananjaya** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	0	0
No. 14—**नीतिसारः Nitisara** (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*).	3	8	0
No. 15—**स्वप्नवासवदत्तम् Svapnavasavadatta** (Nāṭaka) by Bhāsa (*second edition*).	1	8	0
No. 16—**प्रतिज्ञायौगन्धरायणम् Pratijnayaugandharayana** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 17—**पञ्चरात्रम् Pancharatra** (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0
No. 18—**नारायणीयम् Narayaniya** (Stuti) by Nārāyaṇa Bhaṭṭa with the commentary of Deśamangalavārya (*out of stock*).	4	0	0
No. 19—**मानमेयोदयः Manameyodaya** (Mīmāmsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*).	1	4	0
No. 20—**अविमारकम् Avimaraka** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 21—**बालचरितम् Balacarita** (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0

	Rs.	As.	P.
No. 22—**मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारो-रुभङ्गानि Madhyamavyayoga-Duta-vakya-Dutaghatotkaca-Karna-bhara and Urubhanga** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 23—**नानार्थार्णवसंक्षेपः Nanartharnavasam-ksepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*).	1	12	0
No. 24—**जानकीपरिणयः Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*).	1	0	0
No. 25—**काणादसिद्धान्तचन्द्रिका Kanadasiddhanta-candrika** (Nyāya) by Gaṅgādhara-sūri (*out of stock*).	0	12	0
No. 26—**अभिषेकनाटकम् Abhisekanataka** by Bhāsa (*out of stock*).	0	12	0
No. 27—**कुमारसम्भवः Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*).	1	12	0
No. 28—**वैखानसधर्मप्रश्नः Vaikhanasadharmapra-sna** (Dharmasūtra) by Vikhanas (*out of stock*).	0	8	0
No. 29—**नानार्थार्णवसंक्षेपः Nanartharnavasam-ksepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*).	2	4	0
No. 30—**वास्तुविद्या Vastuvidya** (Śilpa) (*out of stock*).	0	12	0
No. 31—**नानार्थार्णवसंक्षेपः Nanartharnavasam-ksepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas).	1	0	0
No. 32—**कुमारसम्भवः Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita Part II, 3rd, 4th and 5th Sargas) (*out of stock*).	2	8	

	RS.	AS.	P.
No. 33—**वाररुचसंग्रहः Vararucasangraha** (Vyākaraṇa) with the commentary Dīpaprabhā of Nārāyaṇa (*out of stock*).	0	8	0
No. 34—**मणिदर्पणः Manidarpana** (Nyāya) by Rājacūḍāmaṇimakhin.	1	4	0
No. 35—**मणिसारः Manisara** (Nyāya) by Gopīnātha.	1	8	0
No. 36—**कुमारसम्भवः Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāsikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part III, 6th, 7th and 8th Sargas).	3	0	0
No. 37—**आशौचाष्टकम् Asaucastaka** (Smṛti) by Vararuci with commentary.	0	4	
No. 38—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the commentary Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part I, 1st Kāṇḍa).	2	0	0
No. 39 **चारुदत्तम् Carudatta** (Nāṭaka) by Bhāsa (*out of stock*).	0	12	0
No. 40—**अलङ्कारसूत्रम् Alankarasutra** by Rājānaka Ruyyaka with the Alaṅkārasarvasva of Mankhuka and its commentary by Samudrabandha (*second edition*).	2	8	0
No. 41—**अध्यात्मपटलम् Adhyatmapatala** (Vedānta) by Āpastamba with Vivaraṇa of Śrī Sankara-Bhagavat-Pāda (*out of stock*).	0	4	0
No. 42—**प्रतिमानाटकम् Pratimanataka** by Bhāsa (*out of stock*).	1	8	0
No. 43—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghaṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part II, 2nd Kanda, 1-6 vargas).	2	8	0
No. 44—**तन्त्रशुद्धम् Tantrasuddha** by Bhaṭṭāraka Vedottama.	0	4	0

	RS.	AS.	P.
No. 45—**प्रपञ्चहृदयम् Prapancahrdaya.**	1	0	0
No. 46—**परिभाषावृत्तिः Paribhasavrtti** (Vyākaraṇa) by Nīlakaṇṭha Dīkṣita.	0	8	0
No. 47—**सिद्धान्तसिद्धाञ्जनम् Sidhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatī (Part I.)	1	12	0
No. 48—**सिद्धान्तसिद्धाञ्जनम् Do.** Do. (Part II).	2	0	0
No. 49—**गोलदीपिका Goladipika** (Jyotiṣa) by Parameśvara.	0	4	0
No. 50—**रसार्णवसुधाकरः Rasarnavasudhakara** (Alaṅkâra) by Singa Bhūpāla.	3	0	0
No. 51—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part III, 2nd Kanda, 7-10 vargas).	2	0	0
No. 52—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghaṭîya Sarvânanda (Part IV, 3rd Kâṇḍa).	1	8	0
No. 53—**शाब्दनिर्णयः Sabdanirnaya** (Vedânta) by Prakâśâtmayatîndra.	0	12	0
No. 54—**स्फोटसिद्धिन्यायविचारः Sphotasiddhinyayavichara** (Vyâkaraṇa).	0	4	0
No. 55—**मत्तविलासप्रहसनम् Mattavilasaprahasana** (Nâṭaka) by Mahendravikramavarman.	0	8	0
No. 56—**मनुष्यालयचन्द्रिका Manusyalayacandrika** (Śilpa) (*out of stock*).	0	8	0
No. 57—**रघुवीरचरितम् Raghuviracarita** (Kâvya).	1	4	0
No. 58—**सिद्धान्तसिद्धाञ्जनम् Siddhantasiddhanjana** (Vedânta) by Kṛṣnânanda Sarasvatî (Part III).	2	0	0

	RS.	AS.	P.
No. 59—नागानन्दम् **Nanganda** (Nâṭaka) by Harṣadeva with the commentary Vimarśinī of Śivarâma (*out of stock*).	3	4	0
No. 60—लघुस्तुतिः **Laghustuti** by Laghubhaṭṭâraka with the commentary of Râghavânanda.	0	8	0
No 61—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (vedânta) by Rṛṣnânanda Sarasvatī (Part IV).	1	4	0
No. 62– सर्वमतसंग्रहः **Sarvamatasangraha.**	0	8	0
No. 63—किरातार्जुनीयम् **Kiratarjuniya** (Kâvya) by Bhāravî with the commentary Sabdârthadīpika of Citrabhânu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः **Meghasandesa** by Kâlidāsa with the commentary Pradīpa of Dakṣiṇâvartanātha.	0	12	0
No. 65—मयमतम् **Mayamata** (Śilpa) by Mayamuni (*out of stock*).	3	4	0
No. 66—महार्थमञ्जरी **Maharthamanjari** (Darśana) with the commentary Parimala of Maheśvarânanda.	2	4	0
No. 67—तन्त्रसमुच्चयः **Tantraasamuccaya** (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śankara (Part I, 1–6 Paṭalās) (*out of stock*).	3	4	0
No. 68—तत्त्वप्रकाशः **Tattvaprakasa** (Āgama) by Śrī Bhojadeva with the commentary Tâtparyadīpikā of Śrī Kumāra.	1	12	0
No. 69—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśânaśivagurudevamiśra Part I, Sâmānyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part I).	2	8	0
No. 71—तन्त्रसमुच्चयः **Tantrasamuccaya** (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara (Part II, 7—12 Paṭalās) (*out of stock*).	3	8	0

	RS.	AS.	P.
No. 72—**ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part II. Mantrapāda).	4	0	0
No. 73—**ईश्वरप्रतिपत्तिप्रकाशः Isvarapratipattiprakasa** (Vedānta) by Madhusūdanasarasvatī.	0	4	0
No. 74—**याज्ञवल्क्यस्मृतिः Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya. (Part I — Âcâra and Vyavahâra Adhyâyās).	3	4	0
No. 75—**शिल्परत्नम् Silparatna** (Śilpa) by Śrīkumâra (Part I).	2	12	0
No. 76—**आर्यमञ्जुश्रीमूलकल्पः Aryamanjusrimulakalpa** (Part II).	3	0	0
No. 77—**ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati** (Tantra) by Iśānaśivagurudevamiśra (Part III, Kriyāpāda 1—30 Paṭalās).	3	0	0
No. 78—**आश्वलायनगृह्यसूत्रम् Asvalayanagrhyasutra** with the commentary Anāvilā of Haradattācārya.	2	6	0
No. 79—**अर्थशास्त्रम् Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part I—1 & 2 Adhikaraṇās).	3	12	0
No. 80—**अर्थशास्त्रम् Do.** Do. (Part II—3—7 Adhikaraṇās).	4	0	0
No. 81—**याज्ञवल्क्यस्मृतिः Yajnavalkyasmrti** with the commentary Bâlakrīḍa of Viśvarūpācārya (Part II. Prâyaścittâdhyâya).	2	0	0
No. 82—**अर्थशास्त्रम् Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part III, 8—15 Adhikaraṇās).	3	4	0
No. 83—**ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati** (Tantra) by Īśāna śivagurudevamiśra (Part IV, Kriyā pāda 31–64 Paṭalās and Yogapāda).	3	8	0

	RS.	AS.	P.
No. 84—**आर्यमञ्जुश्रीमूलकल्पः Aryamanjusrimula-kalpa** (Part III).	2	0	0
No. 85—**विष्णुसंहिता Visnusamhita** (Tantra).	2	8	0
No. 86—**भरतचरितम् Bharatacarita** (Kâvya). by Kṛṣṇakavi.	1	8	0
No. 87—**सङ्गीतसमयसारः Sangitasamayasara** (Sangīta) of Sangītâkara Pârśva-deva.	1	2	0
No. 88—**काव्यप्रकाशः Kavyaprakasa** (Alaṅkâra) of Mammaṭabhaṭṭa with the two commentaries the Sampradāyaprakāśinī of Śrī Vidyācakravartin and the Sâhi-tyacûdâmaṇi of Bhaṭṭagopâla (Part I, 1–5 Ullâsās).	3	0	0
No. 89—**स्फोटसिद्धिः Sphotasiddhi** (Vyākaraṇa) by Bharatamiśra.	0	8	0
No. 90—**मीमांसाश्लोकवार्त्तिकम् Mimamsasloka-vartika** with the commentary Kāśikā of Sucaritamiśra (Part I).	2	8	0
No. 91—**होराशास्त्रम् Horasastra** of Varāhamihirā-cārya with the Vivaraṇa of Rudra.	3	0	0
No. 92—**रसोपनिषत् Rasopanisat.**	2	0	0
No. 93—**वेदान्तपरिभाषा Vedantaparibhasa** (Vedānta) of Dharmarājādhvarīndra with the commentary Prakāśika of Peddādīkṣita.	1	8	0
No. 94—**बृहद्देशी Brihaddesi** (Sangīta) of Matangamuni.	1	8	0
No. 95—**रणदीपिका Ranadipika** (Jyotiṣa) of Kumāragaṇaka.	0	4	0
No. 96—**ऋक्संहिता Rksamhita** with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya (Part I, 1st Adhyāya in 1st Aṣṭaka).	1	8	0

	Rs.	As.	P.
No. 97—**नारदीयमनुसंहिता Naradiyamanusamhita** (Smṛti) with Bhāṣya of Bhavasvāmin.	2	0	0
No. 98—**शिल्परत्नम् Silparatna** (Śilpa) by Śrī-kumāra.	2	8	0
No. 99—**मीमांसाश्लोकवार्त्तिकम् Mimamsasloka-vartika** (Mīmāmsā) with the commentary Kāśikā of Sucaritamiśra (Part II).	2	0	0
No. 100—**काव्यप्रकाश:Kavyaprakasa** (Alaṅkāra) of Mammaṭabhaṭṭa with the two commentaries, Sampradāyaprakāśinī of Śrīvidyācakravartin and Sāhitya-cūḍāmaṇi of Bhaṭṭagopāla. (Part II, 6—10 Ullāsās).	5	0	0
No. 101—**आर्यभटीयम् Aryabhatīya** (Jyotiṣa) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan (Part I. Gaṇitapāda).	2	8	0
No. 102—**दत्तिलम् Dattila** (Saṅgīta) of Dattila-muni.	0	4	0
No. 103—**हंससन्देशः Hamsasandesa** (Vedānta) with commentary.	0	8	0
No. 104—**साम्बपञ्चाशिका Sambapancasika** (Stuti) with commentary.	1	0	0
No. 105—**निधिप्रदीप: Nidhipradipa** of Siddha-śrikaṇṭhaśambhu.	0	4	0
No. 106—**प्रक्रियासर्वस्वम् Prakriyasarvasva.** (Vyākaraṇa) of Śrī Nārāyaṇa Bhaṭṭa with commentary (Part I.)	1	0	0
No. 107—**काव्यरत्नम् Kavyaratna** (Kāvya) of Arhaddāsa	0	12	0
No. 108—**बालमार्तण्डविजयम् Balamartanda-vijaya**. (Nāṭaka) of Devarājakavi.	1	8	0
No. 109—**न्यायसार: Nyayasara** with the commentary of Vāsudevasūri.	1	8	0

	RS.	AS.	P.
110—[illegible] Aryabhatiya (Jyotiṣa) of Aryabhaṭaćārya with the Bhaṣya of Nilakaṇṭhasomasutvan.(Part II. Kalakriyapada)	1	0	0
111—[illegible] Hridayapriya (Vaidyaka) by Paramesvara.	3	0	0
112—[illegible] गजामिलोपाख्यानं च । Kaṅkolopakhyana and Ajamilopakhyana. (Sanglta) by H. H. Svati Sri Rama Varma Maharaja.	0	4	0

Apply to:—

The Curator

for the publication of Oriental Manuscripts,
Trivandrum.